देवप्रयागस्थ-श्रीरघुनाथकीर्तिपरिसरस्य त्रैमासिकी वार्तापत्रिका

# रघुनाथवार्तावली

## संस्कृतसप्ताहोत्सवविशेषाङ्कः

तृतीयवर्षम् (२०१८) ९ अङ्कः जुलाई-सितम्बर, २०१८



मेघाप्लुतश्रावणपूर्णिमायां
सम्पाल्यते तच्छुभसंस्कृताहः!
वर्षासहस्रञ्च शरद्वसन्तं
प्रवर्ततां संस्कृतजाह्नवीयम्॥

प्रधानसम्पादकः
प्रो. के.बी. सुब्बरायुडुः
( प्राचार्यः )

सम्पादकौ
प्रो. बनमालीबिश्वालः
डा. प्रफुल्लगडपालः


'रघुनाथवार्तावली'-सम्बद्धमभिप्रायम्, प्रकाशनयोग्याः कार्यक्रमवार्ताः च अधोलिखित-ई.मेल् सङ्केतेन प्रेषयन्तु-
srkvarta@gmail.com

परिसरस्य जालपुटेऽपि रघुनाथवार्तावली द्रष्टुं शक्यते-
website : www.srkcampus.org


देवप्रयागस्थ-श्रीरघुनाथकीर्तिपरिसरस्य त्रैमासिकी वार्तापत्रिका

# रघुनाथवार्तावली

प्रकाशकः
राष्ट्रियसंस्कृतसंस्थानम्
**श्रीरघुनाथकीर्तिपरिसरः**
देवप्रयागः, पौडी-गढवालः
उत्तराखण्डः-249 301
(दूरभाषः - 01378-266028)
email : srkcampus@gmail.com
website : www.srkcampus.org


## पुरोवाक्



शारदीय-नवरात्र-दीपावल्योरागन्मात्परं रघुनाथवार्तावल्याः नवीनाङ्कस्य प्रकाशनं हर्षं जनयति। त्रैमासिक्या अस्या वार्तावल्या प्रकाशनमिदं प्रथमतया समयेन प्रकाश्यते इत्येतदर्थं सम्पादकौ अवश्यं साधुवादैः समाजनीयौ। यतोहि पत्रिका यदि समयेनात्मप्रकाशं न लभते तर्हि 'कालः पिबति तद्रसम्' इति सूक्तिः सार्थकीभवति। अयञ्च त्रैमासिकः अङ्कः संस्कृतसप्ताहविशेषाङ्करूपेण प्रकाश्यते।

संस्कृतसंस्थानेषु संस्कृतसप्ताहपालनम् उत्सवायते। प्रतिवर्षं श्रावण-पूर्णिमाया आरभ्य सप्त दिनानि यावद् बहुविधाः कार्यक्रमाः आयोज्यन्ते एतदवसरे। ऐषमः अपि न तत्रापवादभूतः। परिसरे छात्रैः अध्यापकैश्च विविधेषु कार्यक्रमेषु सोत्साहं भागं गृहित्वा संस्कृतपक्षोत्सवपालनस्य उद्देश्यः पूरितः। अन्ये च हिन्दीपक्षसदृशाः बहुविधाः कार्यक्रमाः आयोजिताः एतदवधौ। सर्वे च गतिविधयोऽत्र उल्लिखिताः सन्ति। वार्तावल्याः साहित्यखण्डः अपि पाठकमनोरञ्जनाय कल्पिष्यते। परिसरस्य समेऽपि प्राध्यापकाः छात्राश्च स्वीयाः लघ्व्यः रचनाः अत्र प्रकाशयितुम् अर्हन्ति। साहित्यरचनानां प्रकाशनेन संस्कृतसाहित्यपरम्परा नूनं सुदृढा भविष्यतीति भावयामि।


के.बी. सुब्बरायुडुः
प्राचार्यः, श्रीरघुनाथकीर्तिपरिसरः, देवप्रयागः


## प्रतिस्पन्दः




श्रीरघुनाथवार्तावल्याः ७-८ संयुक्ताङ्कौ आद्यन्तं परिशीलितवान्। अन्ताराष्ट्रिय-राष्ट्रिय-सङ्गोष्ठीविशेषाङ्करूपेणास्य वैशिष्ट्यं स्पष्टीभवति। साहित्यखण्डेन समम् अस्याः वार्तावल्याः पद्यमयं सम्पादकीयं मनोहरति। अन्ये च समे वार्तावल्याः विविधस्तम्भाः पूर्वाङ्कवत् प्रस्तुतमङ्कमपि सङ्ग्राह्यं सिद्धयन्ति। सम्पादकाभ्यां प्रो. बनमाली बिश्वाल-डा. प्रफुल्लगड्पालमहोदयाभ्यां हार्दिकैः साधुवादैः सभाजयित्वा पत्रिकाया उत्तरोत्तरं भविष्यं कामयमानो विरमामि विस्तरात्।


- डॉ. विनोदकुमारदीक्षितः
संस्कृतविभागाध्यक्षः
बाबाराघवदास-भगवान्दास-स्नातकोत्तरमहाविद्यालयः,
आश्रमबरहज, देवरिया (उत्तरप्रदेशः)


Thank you Professor Biswal for sending me a copy of Raghunatha-Vartavali (7-8th issue) and also for translating one of my English poems into Sanskrit. I have just gone through your translation of the popular Hindi song 'मानो तो मैं गंगा माँ हूँ'. Wonderful Sir! Congratulations.


- Prof. Susheel Kumar Sharma
Dept. of English, Allahabad University

# सम्पादकीयम्

श्रावणीपूर्णिमायान्तु रक्षाबन्धनमीष्यते।
रक्षार्थं संस्कृताम्बायाः बद्धपरिकराः समे ।१।

पावनदिवसत्वेन संस्कृतदिवसो मतः ।
सप्ताहान्तं दिनात्तस्मात् सप्ताहः संस्कृतीकृतः ।२।

कार्यक्रमाः समे यस्मिन् संस्कृताय समर्पिताः।
तं सप्ताहं पुरस्कृत्य विशेषाङ्को विधीयते ।३।

हिन्दीपक्षोत्सवो मासि भाद्रपदे सुपालितः।
हिन्दी-संस्कृतयोः कश्चित्समन्वयोऽप्यजायत ।४।

संस्कृतस्यानुजा सर्वाः भाषाः भारतीया यतः।
तस्यै समर्पितास्सन्ति हिन्द्याद्योऽन्यास्समाश्च ताः ।५।

शोधपरिषदः किञ्चित्सञ्जातमुपवेशनम्।
अत्रत्य-शोधच्छात्राणां प्रगतयो निरीक्षिताः।६।

स्वतन्त्रतादिनं पुण्यं परिसरे त्वनुष्ठितम्।
छात्रैः प्राध्यापकैर्यत्र विचाराः प्रकटीकृताः।७।

भाद्रे शुभे मुहुर्तेऽत्र परिसरसदस्यकैः।
गणेशपूजनं सर्वैराचरितं पवित्रितैः।८।

सञ्जाताश्चोत्तराखण्डे स्पर्धास्स्तरत्रयान्विताः।
यत्र छात्राः पुरस्कारैर्बहुभिश्च पुरस्कृताः।९।

शिष्टानां भ्रमणं जातं परिसरे यदा तदा।
तत्तद्विवरणञ्चात्र यथास्थानं प्रकाशितम् ।१०।

वार्तावल्या नवीनाङ्कः सप्तमाष्टमसंयुतः।
विशिष्टातिथिभिर्नैकैः लोकायास्ति समर्पितः ।११।

साहित्यं प्रायशश्चात्र देवप्रयागसंश्रितम्।
परिसरसदस्यानां प्रत्यङ्कं वै प्रकाश्यते ।१२।

छात्राः परिसरीयास्ते योग्याः प्राध्यापकास्तथा।
सुलघ्वी रचनाश्चात्र दातुमर्हन्ति नित्यशः ।१३।

ये गतिविधयश्चात्र शैक्षिक्यश्चोपलब्धयः।
वर्तन्ते विदुषां सर्वाः प्रकाश्यन्ते यथाक्रमम् ।१४।

वार्तावल्यास्स्वरूपे यद्वैशिष्ट्यं लक्ष्यते क्वचित्।
नवकुप्यां मधु प्रत्नं पातुर्हितकरं ध्रुवम् ।१५।

सोऽयं परिसरः प्रत्नः प्रत्नाः सम्पादकाः पुनः।
प्रत्नाः स्तम्भाः नवाः वार्ताः नवीनोऽङ्को महीयते ।१६।

-सम्पादकौ

नानाविषयसम्बद्धाः नानारसपरिप्लुताः।
परिसरीयवार्तास्ताः वार्तावल्यां प्रकाशिताः॥

रघुनाथवार्तावली कृपया श्रीरघुनाथस्य प्रसरेत्।
दिशि दिशि प्रापयेदथ वार्ताः परिसरस्याभिनवाः॥

## संवृत्तः संस्कृतसप्ताहोत्सवः



मुख्यवक्तृभाषणं प्रस्तुवन् महन्तः श्रीराजशेखरस्वरूपः

राष्ट्रियसंस्कृतसंस्थानस्य देवप्रयागस्थे श्रीरघुनाथकीर्तिपरिसरे श्रावणी-पूर्णिमावसरे २७.०८.२०१८ दिनाङ्कात् ०४.०९.२०१८ दिनाङ्कं यावत् संस्कृत-सप्ताहोत्सवः समाचरितः।

२८.०८.२०१८ तमे दिनाङ्के उद्घाटनसत्रे प्रो. के. बी. सुब्बरायुडुमहोदयस्य आध्यक्ष्ये मुख्यातिथिः महन्तः श्रीराजेशस्वरूपः सभामुद्बोधितवान्। अवसरेऽस्मिन् महन्तः श्रीराजेशस्वरूपः अवदत् यद् 'भाषायाः महत्तां भविष्यं च दृष्ट्वा भाषा न केवलं देशस्य किन्तु संसारस्य च कृते शोधविषयीभूता भवति।' अस्मिन् अवसरे केन्द्रीयलोक-निर्माणविभागस्य सहायक-अभियन्ता श्रीराजीवकुमारवर्मा तथा कनिष्ठ-अभियन्ता श्रीजितेन्द्रप्रकाशश्च सभाम् उद्बोधितवन्तौ।



संस्कृतसप्ताहोत्सवे संस्कृतशोभायात्रा

अत्र संयोजकः डा. आर्. बालमुरुगः स्वागतभाषणं प्रस्तुतवान् धन्यवादांश्च ज्ञापितवान्।

०८.२०१८ तमे दिनाङ्के परिसर-समेत-देवप्रयागस्थ-संस्कृतच्छात्राणां कृते विविधवर्गेषु विविधाः प्रतियोगिताः समायोजिताः। तद् यथा कनिष्ठवर्गीयछात्राणां कृते गीताकण्ठपाठस्पर्धा निबन्धलेखनस्पर्धा च, तथा वरिष्ठछात्राणां कृते संस्कृत-भाषणस्पर्धा-काव्यकण्ठस्पर्धा-निबन्धलेखनस्पर्धाश्च समायोजिताः। समे च विजेतारः ०४.०९.२०१८ तमे दिनाङ्के सम्पूर्तिसमारोहे अतिथिभिः पुरस्कृताः।



उपजिलाधीशः श्रीरामजीशरणशर्मा अभिनन्द्यते

परिसरप्राचार्यस्याध्यक्षे समायोजिते संस्कृतसप्ताहसम्पूर्तिसमारोहे आदौ व्याकरणविभागाध्यक्षः प्रो. बनमाली बिश्वालः अतिथीनां स्वागतं कृत्वा प्रास्ताविकं प्रस्तुवन् संस्कृतसाहित्यं प्रति संस्कृतपत्रकारिताया योगदानं संक्षिप्य विमृष्टवान्। डा. शैलेन्द्रप्रसाद-उनीयालश्च मुख्यातिथिरूपेण समुपस्थितस्य नवप्रतिष्ठितस्य हरियाणास्थ-वाल्मीकि-संस्कृत-विश्वविद्यालयस्य प्रथमकुलपतेः डा. श्रेयांसद्विवेदिनः अभिनन्दनं श्लोकचतुष्टयेन प्रस्तुतम्। मुख्यातिथिः डा. द्विवेदी स्वभाषणे संस्कृतभाषासाहित्ययोः वैशिष्ट्यं प्रतिपादितवान्। विशिष्टातिथिः पौढीजिलायाः उपजिलाधीशः श्रीरामजीशरणशर्मा संस्कृते वर्तमानं विज्ञानस्वरूपं प्रतिपादितवान्। ततः परिसरप्राचार्यः प्रो. के.बी. सुब्बरायुडुः अवसरेऽस्मिन् संस्कृतभाषायाः महत्त्वं प्रतिपादयन् परिसरस्य प्रगतिविषये स्वाशयम् उपस्थापितवान्।

डा. आर. बालमुरुगः धन्यवादान् ज्ञापितवान् तथा डा. दीनेशचन्द्रपाण्डेयश्च कार्यक्रमस्य सञ्चालनं कृतवान्।

## परिसरीया वार्ता-पत्रिका लोकार्पिता



रघुनाथवार्तावल्याः ५-६ अङ्कौ लोकाय अर्पितौ

संस्कृतसप्ताहमहोत्सवस्य सम्पूर्त्यवसरे अतिथिभिः श्रीरघुनाथवार्तावल्याः ५-६ अङ्कौ लोकाय अर्पितौ। अवसरेऽस्मिन् वाल्मीकिविश्वविद्यालयस्य सम्मान्यः कुलपतिः डा. श्रेयांसद्विवेदी पत्रिकायाः प्रधानसम्पादकः परिसरप्राचार्यश्च प्रो. के.बी. सुब्बरायुडुः सम्पादकौ प्रो. बनमाली बिश्वाल-डा. प्रफुल्लगडपालौ तथा अन्ये च शैक्षणिक-कार्यालयीय-सदस्याः छात्राश्च समुपस्थिताः आसन्। उपस्थिताः अतिथयः अन्ये च रघुनाथवार्तावल्याः निरन्तरं प्रकाशनार्थं सम्पादकेभ्यः साधुवादान् ·प्रदाय अभिनन्दितवन्तः।

## संस्कृतसप्ताहोत्सवे पुरस्कृतानां विजेतृणां विवरणम्

### संस्कृत-एकल-गानम्

| | | |
|---|---|---|
| १. | अनुरुद्धत्रिपाठी | प्रथमः |
| २. | भावेशश्रोत्रियः | द्वितीयः |
| ३. | मोनिका नौगाँई | तृतीयः |

### संस्कृत-समूह-गानम्

| | | |
|---|---|---|
| १. | गार्गीगणः (दीक्षा, साक्षी, विदुषी, दीक्षा) | प्रथमः |
| २. | अदितिगणः (काजल, नेहा, मोनिका,आस्था) | द्वितीयः |
| ३. | खुशीगणः (नेहा, कल्पना, जान्सी, दीक्षा) | तृतीयः |

### संस्कृत-भाषणम् ( कक्षावर्गः ६ तः ८ )

( मम प्रियः कविः )

| | | |
|---|---|---|
| १. | अमनभट्टः | प्रथमः |
| २. | आदित्यभण्डारी | द्वितीयः |
| ३. | अङ्किताठाकुरः | तृतीयः |

### संस्कृत-भाषणम् ( कक्षावर्गः ९ तः १२ )

( सङ्गणक-संस्कृतयोः पारस्परिकः अन्तःसम्बन्धः )

| | | |
|---|---|---|
| १. | रामतिवारी | प्रथमः |
| २. | मोनिका नौगाईं | द्वितीयः |
| ३. | दीपकनौटियालः | तृतीयः |

### काव्यकण्ठपाठः

| | | |
|---|---|---|
| १. | शोभितनौटियालः | प्रथमः |
| २. | मनीषगौडः | द्वितीयः |
| ३. | श्यामदेवः | तृतीयः |

### श्रीमद्भगवद्गीता ( पञ्चदशोऽध्यायः )

| | | |
|---|---|---|
| १. | रामतिवारी | प्रथमः |
| २. | प्रियांशुध्यानी | द्वितीयः |
| ३. | भक्तकृष्णः | तृतीयः |
| | शिखा तिवारी | तृतीयः |

### सुभाषित-कण्ठपाठः ( कक्षावर्गः ६ तः ८ )

| | | |
|---|---|---|
| १. | अमनभट्टः | प्रथमः |
| २. | अञ्जलि राणाकोटी | द्वितीयः |
| ३. | दीक्षा | तृतीयः |

### संस्कृत-भाषणम्

( शास्त्री, आचार्य, B.A., M.A. )

| | | |
|---|---|---|
| १. | सन्दीपकोठारी | प्रथमः |
| २. | प्राची नौटियाल | द्वितीयः |
| ३. | बालकृष्णः | तृतीयः |

### निबन्धलेखनम् ( कक्षावर्गः पारम्परिकः ६ तः८ )

| | | |
|---|---|---|
| १. | हर्षिता | प्रथमः |
| २. | रुचिका कुमारी | द्वितीयः |
| ३. | दीक्षा | तृतीयः |

### निबन्धलेखनम् ( कक्षावर्गः आधुनिकः ६ तः ८ )

| | | |
|---|---|---|
| १. | आयुषी नेगी | प्रथमः |
| २. | शिवानी | द्वितीयः |
| ३. | श्रुतिः | तृतीयः |

### निबन्धलेखनम् ( कक्षावर्गः पारम्परिकः प्राक्शास्त्रि/उत्तरमध्यमा )

| | | |
|---|---|---|
| १. | रामतिवारी | प्रथम |
| २. | दीपकनौटियालः | तृतीय |

### निबन्धलेखनम् ( कक्षावर्गः आधुनिकः ९ तः १२ )

| | | |
|---|---|---|
| १. | नेहा पञ्चभाई | प्रथमः |
| २. | वर्षा भट्ट | द्वितीयः |

### निबन्धलेखनम् ( कक्षावर्गः पारम्परिकः शास्त्री, आचार्यः )

| | | |
|---|---|---|
| १. | श्यामदेवः | प्रथमः |
| २. | सन्दीपकोठारी | द्वितीयः |
| ३. | प्रियङ्का | तृतीयः |

### पुरस्कारदृश्यावली








## हिन्दीपक्षोत्सवः समाचरितः

राष्ट्रियसंस्कृतसंस्थानस्य देवप्रयागस्थे श्रीरघुनाथकीर्तिपरिसरे १४ सितम्बर, २०१८ दिनाङ्कात् २८ सितम्बर, २०१८ दिनाङ्कं यावत् महतोल्लासेन हिन्दीपक्षोत्सवः समाचरितः।

तत्र च १४.०९.२०१८ तमे दिनाङ्के अस्य समारोहस्य उद्घाटनसत्रे परिसरस्य प्राचार्यः प्रो. के.बी. सुब्बरायुडु-महोदयः हिन्दीपक्षोत्सवस्य समर्थने युक्तीः समुपस्थापितवान्। व्याकरणविभागाध्यक्षः प्रो. बनमाली बिश्वालः स्वागतभाषणं प्रस्तुतवान्, ततश्च संस्कृताश्रित-हिन्दीशब्दानाम् उच्चारणवर्तनादिदृष्ट्या विशिष्ट-स्वरूपं प्रतिपादितवान्। मुख्यातिथिरूपेण हरिद्वारस्थस्य देवसंस्कृति- विश्वविद्यालयस्य हिन्दी-विभागसमन्वयकः डा. नरेन्द्रपतापसिंहमहोदयः, मुख्यवक्तृरूपेण डा. सुशील-कोटनालामहोदयः च उद्बोधितवन्तौ। अत्र धन्यवादज्ञापनं परिसरस्य क्रीडाप्राध्यापकः श्रीबिजेन्द्रबिष्टेन तथा सञ्चालनं च सङ्गणकप्राध्यापकेन श्रीपङ्कजकोटियालेन कृतम्।




संयोजकः प्रो. बनमाली बिश्वालः अभिनन्द्यते



श्रीरघुनाथकीर्तिहिन्दीसम्मानेन सम्मानितः डा. सुशीलकोटनालः

२५.०९.२०१८ तमे दिनाङ्के वादविवाद-भाषण-शुद्धलेखन-हिन्दी-सामान्य-ज्ञान-निबन्धलेखनादि-स्पर्धाः छात्राणां कृते तथा नोटिंग-ड्राफ्टिंग-लेखन-शुद्धलेखनस्पर्धाश्च कार्यालयीय-कर्मचारिणां कृते आयोजिताः। प्रत्येकं स्पर्धासु चत्वारः विजेतारः समापन-समारोहे अतिथिभिः पुरस्कृताः। परिसरप्राचार्यस्य प्रो. के. बी. सुब्बरायुडु-महोदयस्याध्यक्षे सम्पन्ने समापन-समारोहे राष्ट्रियसंस्कृतसंस्थानस्य भोपालपरिसरस्य पूर्वप्राचार्यः प्रो. आजादमिश्रः संस्कृत-प्राकृतभाषयोः महत्त्वं प्रतिपादयन् तत्र हिन्दीभाषाया महत्त्वं प्रतिपादितवान्। अस्मिन् समारोहे मुख्यातिथिरूपेण उत्तराखण्डसंस्कृतविश्वविद्यालयस्य कुलपतिः प्रो. पीयूषकान्तदीक्षितमहोदयः तथा सारस्वतातिथिविशिष्टातिथिरूपेण च सुशीलउपाध्यायः, श्रीमोहनजी, श्रीभरतसिंह-कोटियालः डा. अमरजीवलोचनः च सभाम् उद्बोधितवन्तः। अस्मिन्नवसरे डा. सुशीलकोटनालः 'श्रीरघुनाथकीर्ति-हिन्दीसेवासम्मानेन' सम्मानितः। अस्मिन् सम्पूर्ति-सत्रे संयोजकेन प्रो. बनमालीबिश्वालेन स्वागतभाषणं प्रस्तुतम्। तत्र च धन्यवादज्ञापनं सहसंयोजकेन डा. वीरेन्द्रबर्त्वालेन विहितं तथा सञ्चालनं च डा. मुकेशशर्मणा कृतम्।



पुरस्कारवितरणोत्सवस्य एकं दृश्यम्

## हिन्दीपक्षोत्सवस्पर्धासु विजेतारः–

इमे कर्मचारिणः छात्राश्च हिन्दीपक्षोत्सवस्पर्धासु विजेतारः सन्तः पुरस्कृताः अभवन्–

**कर्मचारीणां स्पर्धासु विजेतारः**–नोटिंग-ड्राफ्िंग स्पर्धायां १. नवीनकुमारः, २. ओमप्रकाशः, ३. राजेन्द्रसिंहः ४. अङ्कितथलासी च पुरस्कृताः अभवन्, तथैव शुद्धलेखनस्पर्धायां १. नवीनकुमारः, २. राजेन्द्रसिंहः ३. अङ्कितथलासी ४. ओमप्रकाशः च विजेतारः आसन्।

**छात्राणां स्पर्धासु विजेतारः**–भाषणस्पर्धायां १. मोहितशर्मा, २. नेहापञ्चभाई, ३. श्रीनिवासकोटियालः ४. आशीर्वादकोटियालः च विजेतारः अभवन्। वाद-विवादस्पर्धायां १. प्राचीनौटियालः, २. कनिकागैरोला, ३. नमनकेमनी ४. मोहितशर्मा च पुरस्कृताः अभवन्। निबन्धस्पर्धायां १. नेहापञ्चभाई, २. सन्दीपकोठारी, ३. रूपांशीखण्डूडी ४. दुर्गेशप्रसादः च प्राप्तपुरस्काराः आसन्। शुद्धलेखनस्पर्धायां १. सन्दीपकोठारी, २. श्यामदेवः रूपांशीखण्डूडी च, ३. रोहितकुमारः, ४. आकृतिकोटियालः मनीषनौटियालः च विजेतारः अभूवन्। सामान्यज्ञानस्पर्धायां १. सन्दीपकोठारी, २. शुभमभट्टः, ३. प्रियङ्काजगूडी, ४. मनीषगौडः च पुरस्कारान् प्राप्नुवन्। एवमेव निबन्धस्पर्धायां १. नेहापञ्चभाई, २. सन्दीपकोठारी, ३. रूपांशीखण्डूडी ४. दुर्गेशप्रसादः च पुरस्कृताः।

## शोधसमित्युपवेशनं सम्पन्नम्

२३.०८.२०१८ तमे दिनाङ्के एकादश-वादने परिसरे एकं स्थानीय-शोधसमित्युपवेशनं सम्पन्नं, यत्र परिसरप्राचार्यस्य प्रो. के.बी. सुब्बरायुडुमहोदयस्य आध्यक्ष्ये प्रो. बनमालीबिश्वालस्य संयोजकत्वे प्रो. विनितघिडियाल, डा. आर्. बालमुरुगन्, डा. प्रफुल्लगडपाल: अन्ये च बाह्याभ्यन्तरीय-सदस्या: समुपस्थिता: आसन्।

अस्मिन्नुपवेशने नवीनशोधच्छात्राणां शोधविषयस्वीकृतिपूर्वकं शोधप्रबन्धप्रारूपनिर्धारणं संशोधनञ्च सदस्यै: विहितम्। पूर्वशोधच्छात्राणां प्रगतिपरिशीलनपूर्वकं तेभ्य: छात्रवृत्तिप्रदानाय अनुमोदनमपि विहितम्।

### परिसरीयशोधच्छात्राणां शोधविवरणम्-

**१. हरिश्चन्द्रडङ्गवाल:-**

पातञ्जलमहाभाष्ये वर्णितानां वैज्ञानिकतत्त्वानां समीक्षात्मकमध्ययनम्, व्याकरणविभाग:
-मार्गदर्शक:-प्रो. बनमाली बिश्वाल: (पञ्जीकरणदिनाङ्क:-२०.१०.२०१६)

**२. देवेन्द्रप्रसाद:-**

हर्षवर्द्धनसाहित्ये दार्शनिकतत्त्वानां विमर्श:, साहित्यविभाग:
-मार्गदर्शक:-प्रो. के.बी. सुब्बरायुडु: (पञ्जीकरणदिनाङ्क:-२०.१०.२०१६)

**३. अंशुमान् पाठक:-**

न्यायसिद्धान्तमुक्तावल्यां पदार्थानां साधर्म्यवैधर्म्यनिरूपणे प्रशस्तपादभाष्यस्य प्रभाव:, न्यायविभाग:
-मार्गदर्शक:-डा. आर. बालमुरुगन् (पञ्जीकरणदिनाङ्क:-२२.०९.२०१६)

**४. किशोरकुमार:-**

शब्दतत्त्वचिन्तामण्यालोकस्य श्रीमथुरानाथतर्कवागीशकृत-'रहस्य'व्याख्याया: पाठसमीक्षात्मकं सम्पादनम्, न्यायविभाग:
-मार्गदर्शक:-डा. आर. बालमुरुगन् (पञ्जीकरणदिनाङ्क:-१८.०८.२०१७)

**५. मधुसूदनसती-**

उत्तराखण्डीयसमकालिकसर्जनात्मकसंस्कृतरचनाप्रवृत्तय: - एकं समीक्षात्मकमध्ययनम्, साहित्यविभाग:
-मार्गदर्शक:-प्रो. बनमाली बिश्वाल: (पञ्जीकरणदिनाङ्क:-०९.०८.२०१७)

**६. गोपेशपाण्डेय:-**

श्रीमच्छङ्कराचार्याणां प्रमुखप्रकरणग्रन्थानां समीक्षात्मकमध्ययनम्, वेदान्तविभाग:
-मार्गदर्शक:-प्रो. के.बी. सुब्बरायुडु: (पञ्जीकरणदिनाङ्क:-०४.०८.२०१७)

## स्वामिन: चिदानन्दस्य अन्तेवासिभि: परिसरभ्रमणम्

एतदवधौ ऋषिकेशस्थस्य परमार्थनिकेतनस्य स्वामिन: चिदानन्दस्य परिसरे अन्तेवासिभि: परिभ्रमणं संवृत्तम्। तेन सह न केवलं भारतीया:, किन्तु नैके वैदेशिका: शिष्या: भक्ताश्च परिसरे समुपस्थिता: अभूवन्। प्राचार्यमहोदयस्य आध्यक्ष्ये स्वामी चिदानन्दमहोदय:, अन्ये विशिष्टा: भक्ता:, विद्वांस: अतिथयश्च छात्रान् उद्बोधितवन्त:।

स्वामिनी अमेरिकावासिनी विदेशिनी भगवती हिन्दीभाषया स्वभाषणं प्रस्तुवन्ती अवदत् यद् देवप्रयाग: तादृश: देशो वर्तते-यस्य कृते एतद् हिन्दीवचनं सार्थकीभवति यत् 'जिस देश में गंगा बनती है।' अत्र ध्यातव्यमस्ति यदस्मादेव देवप्रयागात् भागिरथ्यलकनन्दयो: संयोगेन गङ्गा उत्पद्यते इति।


स्वामिनी भगवती अभिन्द्यते

## खण्ड-( ब्लाक )-स्तरीयस्पर्धासु परिसरीयच्छात्राणां भागग्रहणम्

कोटखण्डस्य खण्डस्तरीयस्पर्धा: सितम्बरमासस्य ६ दिनाङ्के राजकीय-इण्टर-कालेज कोट इत्यत्र सुसम्पन्ना: । वरिष्ठस्तरे आहत्य ६ स्पर्धा: आयोजिता:। यत्र वादविवाद:, आशुभाषणं, समूहगानं, समूहनृत्यं, संस्कृतनाटकं, श्लोकोच्चारण-स्पर्धा च अन्तर्भवन्ति।

परिसरच्छात्रा: समूहनृत्यं विहाय सर्वासु स्पर्धासु भागं गृहीत्वा संस्कृतनाटके द्वितीयस्थानं, वादविवादे द्वितीयस्थानं, आशुभाषणे द्वितीयस्थानं, समूहगाने प्रथमस्थानं, श्लोकोच्चारणे च प्रथमस्थानं प्राप्तवन्त: । प्रथमद्वितीयस्थानभाज: छात्रा: जिलास्तरनिमित्तं चिता: अभूवन्। अत्र मार्गदर्शका: आसन्–डा. मुकेशकुमार:, डा. वीरेन्द्रबर्त्वाल:, डा. दिनेशचन्द्रपाण्डेय: च।




परिसरछात्रै: प्रस्तुतस्य बालिवधाख्यस्य संस्कृतनाटकस्य एकं दृश्यम्

## जिला-स्तरीयस्पर्धासु परिसरीयच्छात्राणां भागग्रहणम्



समूहगानं प्रस्तुवन्त: परिसरच्छात्रा:

पौडीजनपदस्य जिलास्तरीयस्पर्धा: १२-१३ दिनाङ्कयो: तिमलीस्थे सरस्वती-विद्यामन्दिरे सुसम्पन्ना:।

तत्र परिसरच्छात्रा: वादविवादे प्रथमस्थानं, संस्कृतनाटके द्वितीयस्थानं, समूहगाने द्वितीयं, श्लोकोच्चारणे आशुभाषणे च तृतीयं स्थानं प्राप्तवन्त:। वाद-विवादे प्रथमद्वितीयस्थानभाजौ द्वौ छात्रौ (आचार्यप्रथमवर्षीय: बालकृष्ण-सेमवाल:, प्राक्शास्त्रिप्रथमवर्षीय: दीपकनौटियालश्च) राज्यस्तरनिमित्तं चितौ। अत्र मार्गदर्शका: डा. मुकेशकुमार: डा. वीरेन्द्रबर्त्वाल:, डा. दिनेशचन्द्रपाण्डेय: च आसन्।

## राज्यस्तरीयस्पर्धासु परिसरीयच्छात्राणां भागग्रहणम्




नाटकस्य भरतवाक्यम् उद्घोषयन्त: अभिनेतार: छात्रा:

सितम्बरमासस्य १९-२० दिनाङ्कयो: हरिद्वारस्थे महाजनभवने राज्यस्तरीय-स्पर्धा: सुसम्पन्ना:। अस्मिन् राज्यस्तरीयस्पर्धाकार्यक्रमे समग्रप्रदेशस्य छात्रा: समवेता: आसन्। जिलास्तरीयस्पर्धायां विजेतारौ परिसरीयौ छात्रौ अत्र भागभाजौ अभवताम्।

अस्यां स्पर्धायां परिसरच्छात्राभ्यां बालकृष्णसेमवाल-दीपकनौटियालाभ्यां वादविवादस्पर्धायां भाग: गृहीत: तथा प्रशंसाभाजौ च अभूताम्। डा. दिनेशचन्द्र-पाण्डेय: डा. मुकेशकुमार: च एतत्सन्दर्भे छात्रयो: मार्गदर्शनं कृतवन्तौ।

## विधायकस्य परिसरागमनम्

११ सितम्बर, २०१८ तमे दिनाङ्के देवप्रयागक्षेत्रस्य विधायकस्य श्रीविनोद-कण्डारीमहोदयस्य परिसरेऽस्मिन् परिभ्रमणं प्रमोदाय कल्पितम्। एतदवसरे स: परिसरप्राचार्येण तथा अन्यैश्च प्राध्यापकै: मिलित्वा परिसरनिर्माणकार्यप्रगते: सूचनां स्वीकृतवान्।

आवश्यकतायां सत्यां परिसराय स्वकीयं सहयोगं दातुं च विधायकमहोदय: प्राचार्यसमेतं परिसरपरिवारं प्रतिश्रुतवान्।



विधायक: विनोदकण्डारी अभिन्द्यते

## आचरितः गणेशोत्सवः



भगवन्तं गणेशं समर्चयन्तः परिसरप्राचार्यः, प्राध्यापकाः छात्राश्च

१३.०९.२०१८ तमे दिनाङ्के सोमवासरे श्रीरघुनाथकीर्तिपरिसरे गणेशोत्सवः समाचरितः। अस्मिन् महोत्सवे परिसरप्राचार्येण प्रो. के. बी. सुब्बरायुडुमहोदयेन गणपतेः समर्चनं विहितम्। कार्यक्रमेऽस्मिन् वेदविभागस्य प्राध्यापकेन डॉ. शैलेन्द्र-प्रसाद-उनीयालमहोदयेन पञ्चाङ्गपीठ-निर्माणपूर्वकं वैदिकविधिना विघ्नहर्तुः आदि-देवस्य गणेशस्य षोडशोपचारेण पूजनं कारितम्।

अस्मिन्नवसरे परिसरस्य सर्वे प्राध्यापकाः छात्राश्च गणनायकं वक्रतुण्ड-मार्चन्।

## स्वतन्त्रतादिवसोत्सवः पालितः



स्वतन्त्रतादिवसोत्सवस्य कार्यक्रमे भाषमाणः छात्रः

राष्ट्रियसंस्कृतसंस्थानस्य देवप्रयागस्थे श्रीरघुनाथकीर्तिपरिसरे १५.०८.२०१८ तमे दिनाङ्के महतोत्साहेन समायोजितः द्वासप्ततितमः स्वतन्त्रतादिवसोत्सवः।

परिसरप्राचार्येण प्रो.के.बी.सुब्बरायुडु-महोदयेन परिसरप्राङ्गणे ध्वजारोहणं विहितम्। ततः ध्वजवन्दनपूर्वकं सर्वैः प्राध्यापकैः छात्रैश्च समस्वरेण राष्ट्रगानं विहितम्। अनन्तरं राष्ट्रियपर्वण्यस्मिन् परिसरछात्रैः देशभक्तिभावसंवलिताः गीत-भाषणादिरूपाः नैके सांस्कृतिककार्यक्रमाः प्रस्तुताः। कार्यक्रमोद्बोधनपुरःसरं प्रो. बनमालीबिश्वालेन 'वन्दे प्रियं भारत'मिति स्वरचितं संस्कृतकाव्यं प्रस्तुतम्।

डा. दिनेशचन्द्रपाण्डेयेन चलचित्ररागेणानूदितं संस्कृतगीतं प्रस्तुतम्। डा. मुकेशकुमार-श्रीओमशर्मभ्यामपि अवसरोचितं मन्तव्यं प्रस्तुतम्। आचार्यछात्रेण श्री रोहितकुमारेण सञ्चालनं तथा श्रीबालकृष्णसेमवालेन धन्यवादार्पणं कृतम्।

## नवनिर्मितभवनप्रवेशार्थं पूजनं कथाश्रवणं च



पूजनस्य किञ्चन दृश्यम्

परिसरप्राचार्यस्य प्रो. के.बी. सुब्बरायुडुमहोदयस्य नेतृत्वे डा. शैलेन्द्रप्रसाद-उनीयालस्य पौरोहित्ये च पत्रिकायाः मुखपृष्ठे प्रदर्शितस्य नवनिर्मितस्य भवनप्रवेशार्थं पूजनं कथाश्रवणं च सञ्जातम्। अवसरेऽस्मिन् प्रो. बनमाली बिश्वालः, डा. बालमुरुगन्, डा. प्रफुल्लगडपालः, डा. मुकेशकुमारः, डा. वीरेन्द्रबर्त्त्वालः, डा. सुरेशकुमारशर्मा, डा. अरविन्दसिंहगौडः, श्रीपङ्कजकोटियालः, डा. दीनेशचन्द्रपाण्डेयः चेत्यादयः प्राध्यापकाः समुपस्थिताः सन्तः पूजायां भागं गृहीतवन्तः।

अवसरेऽस्मिन् श्रीशङ्करजयकिशनः, श्रीचन्दनसिंहरावतः, श्रीहरिबहादुरथापा, इत्यादयः कार्यालयीयसदस्याः अपि उपस्थिताः आसन्। अत्र च अवसरेऽस्मिन् परिसरीयच्छात्राः समुपस्थाय परिसरप्राङ्गणे निर्मितस्य भवनस्य वास्तुपूजने कथाश्रवणे च अहमहमिकया भागम् अगृह्णन्।

## परिसरे निर्माणार्थं स्वीकृतानि भवनानि

| | | |
|---|---|---|
| – शैक्षिकभवनम् | पुरुषशोधछात्रावासभवनम् | – कर्मचारिणाम् आवासभवनम् |
| – प्रशासनिकभवनम् | महिलाशोधछात्रावासभवनम् | – प्राचार्य-आवास-भवनम् |
| – क्रीडाङ्गणम् | बालकछात्रावासभवनम् | – अतिथिभवनम् |
| | बालिकाछात्रावासभवनम् | |

## प्राचार्य-दैनन्दिनी

| | |
|---|---|
| ०९.१०.२०१८ | संस्थान-सभाभवने उपवेशने भागग्रहणम्। |
| २७-२९.०९.२०१८ | गरली-परिसरे वेदान्तसङ्गोष्ठ्यां मुख्यवक्तृत्वसम्पादनम्। |
| २३.०८.२०१८ | वैयक्तिके अवकाशे हैदराबादगमनम्। |
| २७.०७.२०१८ | मुख्यालये प्राचार्य-अधिवेशने भागग्रहणम्। |
| १३.०७.२०१८ | वैयक्तिकावकाशे बहिर्गमनम्। |

## परिसरीय-विदुषां शैक्षिक्यः उपलब्धयः गतिविधयश्च

### १. प्रो. बनमालीबिश्वालः–

- श्रीरघुनाथकीर्तिपरिसरस्य द्वयोः शोधच्छात्रयोः विषयचयने शोधसंक्षेपिकादिनिर्माणे च मार्गदर्शनं कृतम्।
- रवीन्द्रभारतीविश्वविद्यालय-गोरखपुरविश्वविद्यालययो द्वयोः शोधप्रबन्धयोः बाह्यपरीक्षकत्वेन मूल्याङ्कनं विहितम्।
- श्रीरघुनाथकीर्तिपरिसरे २३.०८.२०१८ तमे दिनाङ्के आन्तरिकसदस्यत्वेन शोधसमुत्पुपवेशने संयोजनं कृतम्।
- ४.०९.२०१८ तमे दिनाङ्के संस्कृतसप्ताह-सम्पूर्तिसमारोहे स्वागतभाषणं प्रस्तुतम्।
- १४-२८ सेप्टेम्बर २०१८ यावत् प्रवर्तिते हिन्दीपक्षोत्सवकार्यक्रमे संयोजकत्वं निर्व्यूढम् तथा तत्रैव उद्घाटनसत्रे समापनसत्रे च प्रास्ताविकं स्वागतभाषणं च प्रस्तुतम्।
- २८-३० सितम्बर, २०१८ दिनाङ्केषु गरलिस्थे वेदव्यासपरिसरे व्याकरणविभागीय-राष्ट्रिय सङ्गोष्ठ्यां 'वृत्तिभेदाः तत्स्वरूपञ्च' इति विषयमधिकृत्य विशिष्टं व्याख्यानं प्रदत्तम्। तत्र च एकस्मिन् पत्रवाचनसत्रे आध्यक्ष्यं निर्व्यूढम्।
- एतदवधौ विश्ववाराख्य-प्राच्यविद्याशोधपत्रिकायाः प्रवेशाङ्कस्य, कथासरितः २६ तमस्य अङ्कस्य, पद्यबन्धाया द्वादशाङ्कस्य रघुनाथवार्तावल्याः नवमाङ्कस्य च सम्पादनं कृतम्।

### २. डॉ. प्रफुल्लगडपालः–

- श्रीरघुनाथकीर्तिपरिसरे २७.०८.२०१८ तः ०४.०९.२०१८ दिनाङ्कं यावत् सम्पन्ने संस्कृतसप्ताहोत्सवे कस्याञ्चित् एकस्यां स्पर्धायां निर्णायक-दायित्वं निर्व्यूढम्।
- श्रीरघुनाथकीर्तिपरिसरे १४.०९.२०१८ तः २८.०९.२०१८ दिनाङ्कपर्यन्तं प्रचलिते हिन्दीपक्षोत्सवे कस्याञ्चित् एकस्यां स्पर्धायां निर्णायक-दायित्वं निर्व्यूढम्।
- श्रीरघुनाथकीर्तिपरिसरे २३.०८.२०१८ तमे दिनाङ्के आन्तरिकसदस्यत्वेन शोधसमुत्पुपवेशने भागग्रहणं कृतम्।
- अस्मिन्नवधौ एकस्य शोधच्छात्रस्य शोधप्रबन्धः संशोधितः, द्वयोः शोधनिर्देशः विहितः।
- अस्मिन्नवधौ पालिसंवादो रघुनाथवार्तावली चेति पत्रिके सम्पादिते।

### ३. डॉ. शैलेन्द्रप्रसादउनियालः–

- वेदविभागीयप्राध्यापकोऽयं १३-१४ अगस्त, २०१८ तमयोः दिनाङ्कयोः उज्जयिन्यां महर्षिसान्दीपनिराष्ट्रियवेदविद्याप्रतिष्ठाने शुक्लयजुर्वेदीयसम्परीक्षकदायित्वं निर्व्यूढवान्।

### ४. डॉ. वीरेन्द्रबर्त्वालः–

- १४-२८ सेप्टेम्बर २०१८ यावत् प्रवर्तिते हिन्दीपक्षोत्सवकार्यक्रमे सहसंयोजकत्वं निर्व्यूढम्। तत्र च प्रवर्तमानासु स्पर्धासु निर्णायकत्वं विहितम्।
- एतदवधौ गढवालीभाषाशब्दकोशः 'अञ्वाल' प्रकाशितः।

### ५. डॉ. नीतेशकुमारद्विवेदी–

- २८-३० सितम्बर, २०१८ दिनाङ्केषु गरलीस्थे वेदव्यासपरिसरे व्याकरणविभागीय-राष्ट्रिय सङ्गोष्ठ्यां 'मञ्जषादृष्ट्या वृत्तिविचारः' इति विषयमधिकृत्य शोधपत्रं प्रस्तुतम्।
- २७.०८.२०१८ तः ०४.०९.२०१८ दिनाङ्कं यावत् सम्पन्ने संस्कृतसप्ताहोत्सवे अपि च १४.०९.२०१८ तः २८.०९.२०१८ दिनाङ्कपर्यन्तं प्रचलिते हिन्दीपक्षोत्सवे स्पर्धासु निर्णायक-दायित्वं निर्व्यूढम्।
- एतदवधौ 'विभक्त्यर्थमीमांसा' इति पुस्तकं प्रकाशितम्।

## प्रकृत्याः क्रोडे

(In the lap of Nature)

अंग्रेजीमूलम्–प्रो. सुशीलकुमारशर्मा
संस्कृतानुवादः–प्रो. बनमाली बिश्वालः

मम अधो ह्रदः
तदग्रे, तमसाच्छन्नः चाइनाशिखरः
तदूर्ध्वं तु काचित् तारकिता रात्रिः
यदाह्वयति
बुभुक्षितं चन्द्रम्
आनन्दमुपभोक्तुम्
द्वयोः नक्षत्रयोः शून्ये स्थाने।

अदृष्टः सन्
स्थगितोऽहम्–
प्रसारयन् स्वीयं बाहुं
ममाञ्जलौ त्वाञ्च समानेतुम्।

स्वप्नः प्रतिबद्धः
त्वच्चक्षुषोः
प्रतिबिम्बयित्वा क्वचित् चन्द्रम्।

अनुपस्थितोऽहम्
उपेक्षिष्ये गुरुत्वाकर्षणनियमम्
चुम्बितुं त्वां त्वदीयकपाले
उपावेशयितुं च त्वाम्
मदीयोपवेशनप्रकोष्ठे।

त्वत्समक्षं चित्रितव्या मदीयास्ताः मुक्ताः
त्वत्परितः स्वप्नान् मे वयामि
उदासीनायाः पृथिव्या दूरे क्वचिद् गन्तुम्।

Below me the lake
Beyond that, the dark China peake
And above a starry night
That summons
The craving moon
To enjoy the bliss
In the space between two stars.

Remaining unseen
I hold on –
Stretch my arms
To bring you to my folds.

The dream is entangled
In your eyes
Reflecting the moon.

I remain absent
I have to defy the law of gravity
To kiss you on your forehead
And make you sit in my drawing room

I have to cast my pearls before you
And weave my dreams around you
To be away from the frigid earth.

## मानवस्य मानवेन सुभ्रातृता

(इंसान का इंसान से हो भाईचारा)

हिन्दीमूलम्–कविप्रदीपः
संस्कृतानुवादः–प्रो. बनमाली बिश्वालः

आ........ आ....... आ.............
मानवस्य मानवेन सुभ्रातृता
एषा त्वस्मदीया वार्ता
एषा त्वस्मदीया वार्ता।

नवीने जगति जाता सा प्राचीना ह्युच्च-नीचमयी कथा
मिलेत् समेभ्यो श्रमानुसारं स्व-स्व-अंशभागिता
समेषां कृते सुखस्य चास्तु समान-सहभागिता
एषा त्वस्मदीया वार्ता
एषा त्वस्मदीया वार्ता।

प्रतिभोगभवनं वद कुटीरेषु दीपमेकं प्रज्वालयेत्
लघु-महतोर्मध्ये च साम्प्रतं भेदो न कश्चित्तिष्ठेत्
धरायामस्यां भवतु प्रेम्णः प्रतिगृहमुज्ज्वलिका
एषा त्वस्मदीया वार्ता
एषा त्वस्मदीया वार्ता।

मानवस्य मानवेन सुभ्रातृता
एषा त्वस्मदीया वार्ता
एषा त्वस्मदीया वार्ता।

आ........ आ....... आ.............
इंसान का इंसान से हो भाईचारा,
यही पैगाम हमारा
यही पैगाम हमारा।

नये जगत में हुआ पुराना ऊँच-नीच का किस्सा
सबको मिले मेहनत के मुताबिक अपना-अपना हिस्सा
सबके लिए सुख का बराबर हो बँटवारा
यही पैगाम हमारा
यही पैगाम हमारा।

हरेक महल से कहो की झोपड़ियों में दिये जलाये
छोटों और बड़ों में अब कोई फर्क नहीं रह जाये
इस धरती पर हो प्यार का घर-घर उजियारा
यही पैगाम हमारा
यही पैगाम हमारा।

इंसान का इंसान से हो भाईचारा
यही पैगाम हमारा
यही पैगाम हमारा।

## अशोकोपाख्यानम्

**डा. प्रफुल्लगडपालः**

बोधिप्राप्तिनिमित्तेनाशोकेन हि विहारकः।
ज्ञानोदयस्मृतौ पश्चात्कारितोऽभूतपूर्वकः।।१।।
नराधिपो निराशस्सन् संग्रामके कलिङ्गके।
स्वीचकार च सद्धर्मं शान्तिदं करुणाकरम्।।२।।
स्थविरेणोपगुप्तेन प्रबोधितः प्रजापिता।
चतुरङ्गबलं नीत्वा बौद्धतीर्थ्यं गतस्ततः।।३।।
ततो नैकत्र यात्रां स चाकरोद् धर्मनायकः।
बुद्धजीवनसम्बद्धां शुभां चित्तप्रसादिनीम्।।४।।
लौहस्तम्भांश्च नैकत्र राष्ट्रे सद्धर्मबोधकान्।
सद्वचनानि पाल्यां नु ह्यकरोत्प्रियदर्शकः।।५।।
कार्याणि तेन नैकानि विहितानि महान्ति च।
प्रजाकार्येषु संरक्तोऽहर्निशं भूपतिः प्रियः।।६।।
इतिहासे महान् सम्राट् धर्मरक्षो धुरन्धरः।
चक्रवर्ती महाज्ञानी प्रचारकः प्रजापिता।।७।।
उरुविल्वे वने सम्राट् महाबोधिविहारकम्।
सुचारुं स्थापयामास सुवास्तुकं शुभं दृढम्।।८।।
धर्मराजा प्रवासे च कालेऽमात्यैः जनैः सह।
परिवारेण सम्पूजामकारयद् द्रुमस्य नु।।९।।
'धर्मं धर्माकरं नत्वा वन्दे तरुं महाबोधिम्।
वज्रासनं महाभक्त्या प्रणिपत्याभिवादये।।१०।।
महाबोधिद्रुमस्स्वस्तिदायकः पर्युपास्यते।
पुष्पधूपादिगन्धैश्च दीपैः प्रकाशमान् शुभः।।११।।
बोधिं च स्नापयिष्यामि कुम्भैर्गन्धोदकाकुलैः।
संघस्य च करिष्यामि सत्कारं पञ्चवार्षिकम्'।।१२।।
अशोकेनात्र सर्वादौ स्तूपः प्रांशुश्शुभस्तथा।
निर्मापितो वरेण्यश्च कलापूर्णस्सुवास्तुकः।।१३।।
ततस्तत्रैव निर्व्यूहं निर्मापितं शुभं सुभूम्।
सुशोभते विहारे तत्सद्योऽपि प्राङ्गणे तले।।१४।।
कालचक्रं सदा लोके भ्रमति प्रवरेऽवरे।
बोधिराजस्य कालस्तु विपर्यासं गतस्तथा।।१५।।
अशोकस्य महासक्तिं संवीक्ष्य तिष्यरक्षिता।
बौद्धधर्मं प्रति द्वेषं गता सा नृपवल्लभा।।१६।।
अकारयत्प्रयासान् सा दुष्टा नाशयितुं द्रुमम्।
प्रयासाः कुत्सिता तस्याः साफल्यं तु गतास्तदा।।१७।।
अकथयच्च मातङ्गीं सूत्रितुं तिष्यरक्षिता।
सूत्रिते हि महावृक्षः सुशुष्कतां गतस्ततः।।१८।।
उद्वेगिनी श्रुतिः पश्चाद् व्यथाकरी च दारुणा।
कल्याणकांक्षिणे द्रोश्च भूपतये निवेदिता।।१९।।
ज्ञात्वा वृक्षस्य शुष्कत्वं निश्चैतन्यं गतो नृपः।
पतितो भूपतिर्भूमिं शोकोऽशोकस्य दुःसहः।।२०।।
सम्प्रज्ञाने नृपो धीमान् चक्रवर्ती महाबलः।
सुनादमकरोदुच्चैः द्रुमराजस्य वत्सलः।।२१।।
'द्रुमं संवीक्ष्य जानामि नाथो दृष्टो मया यथा।
नाथद्रुमे प्रणाशे हि प्राणान् त्यक्ष्यामि तत्क्षणम्'।।२२।।
महाश्रद्धां तु संवीक्ष्य नृदेवी तिष्यरक्षिता।
सूत्रं द्रुमस्य मुक्त्वा च निश्चिन्ता पापकारिणी।।२३।।
मृत्तिका सर्वतो मञ्चे पूरयित्वा सुरक्षिका।
क्षीरकुम्भसहस्रेणाभिषेकं द्रुमके तथा।।२४।।
अशोकेन नृपेणापि संरक्षणे द्रुमस्य च।
प्रयासाः विहिता नैके सुसाफल्यं गतास्समे।।२५।।
बोधिवृक्षस्य रक्षायै भित्तिं तत्सर्वतो दृढाम्।
हस्तिस्तम्भं च तत्रैव स्थापयद्धर्मनायकः।।२६।।

(महाबोधिद्रुमविजयकाव्यतः उद्धृतम्)

## आर्यापञ्चकम्

**प्रो. बनमालीबिश्वालः**

जगत्यहङ्कारो वद तिष्ठति किं कस्य प्रभो त्वां विना।
मूढो मनुष्योऽद्यापि मानयति स्वप्रभुत्वम्।१।
यन्मिलति प्रभोः कृपया वरं मन्यतां तेनैव सन्तोषः।
प्रतीक्षया को लाभः यदि भाग्यं विपरीतं लोकस्य।२।
हृदये प्रेम भवति बह्वीनां कामिनीनां सकाशात्।
परन्त्वत्र सम्प्रयोगः भवति कयाचिदेव जीवने।३।
दुःखं स्वकीयमेव मन्यते स्म गुरुतरं लोके।
यदा दृष्टवान् दुःखं लोकस्य विस्मृतवान् स्वकीयम्।४।
धन्यैव सा नारी या प्रेरयति तपस्विनोऽपि कुमार्गे।
तपः द्वादशवर्षीयं प्रवहति शुष्कमत्स्यव्यञ्जने।५।

यशस्विनां सम्मान्यकुलपतीनां श्रीमतां श्रेयांशद्विवेदिवर्याणाम्

## ।।अभिनन्दनचतुष्टयम्।।

**डा. शैलेन्द्रप्रसादउनियालः**

लक्ष्यं सुरक्ष्यं हि यस्यास्ति बुद्धौ, राष्ट्रं भवेद्विश्वगुरुर्मदीयम्।
लब्धं पदं कौलपत्यं महिम्ना, श्रेयांशवर्याः कवयः सुमर्याः।।१।।
साहित्यसङ्गीत-सुकाव्यपाठो, वेदाङ्गवेदेषु च सत्यनिष्ठो।
धर्मार्थतः संस्कृतमेव बोधयन् परिपुष्यमाणो विलसन् विराजते।।२।।
महर्षिवाल्मीकियशः समृद्धये, स्वसंस्कृतेः संस्कृतवृद्धये च।
विज्ञानसज्ज्ञान-सुशिक्षणाय, कृतानुसन्धान-विदेऽस्तु मङ्गलम्।।३।।
लोकद्वयं साधुतया समाहरन्, जीवैंश्च चातुर्ययुतोऽस्ति विद्वान्।
रघुनाथपीठेऽत्र सुशोभितोऽद्य श्रेयः परं श्रीञ्च लभेत स्विष्टम्।।४।।

## ।देवप्रयागस्थ-रघुनाथाभिवन्दनम्।

**सन्दीप-कोठारी**

देवप्रयागे वसन्तं परेशं रघुं राममीशं परानन्दरूपम्।
शरच्चन्द्रवक्त्रं सुरारार्तिनाशं भजेऽहं हि रामं परानन्दरूपम्।।
अजं शाश्वतं कारणं कारणानां चिदानन्दकन्दं सदा राघवेन्द्रम्।
तमीडे श्रीरामं रघूणामधीशं सीतापतिं च तं सततं नमामि।।
सुरम्ये सुतीर्थे सदा सज्जनानां हरेद्दुष्कृतानि किरीटादिशोभम्।
लसत्पद्मनेत्रं पुरारातिलाभं भजे रामचन्द्रं दुरावारपारम्।।
भागीरथीपावनपुण्यतीर्थे वसन्तं वरेण्यं कपीशादिमित्रम्।
सुराधीशनीलाभ्रनीलाङ्गकान्तिं तमेवं श्रीरामं भजे रावणारिम्।।

## देवप्रयागसम्बद्धं पञ्चानन-पञ्चामृतम्

प्रो. बनमालीबिश्वालः

### १. श्रीवागीश्वर-पञ्चकम्

सरस्वती विलुप्ता सा सरिद्रूपा वागीश्वरी।
देवप्रयागमागत्य कृतवती महत्तपः।१।
स्थाने प्राकृतिके रम्ये गङ्गाया निर्जने तटे।
निरन्तरं तपः कृत्वा वाणी शिवमाराधयत्।२।
तत्तपसा प्रसन्नस्सन् कृपावशाच्च शङ्करः।
स्वयम्भूश्च शिवस्तत्र वरं दातुमाविरभूत्।३।
देवप्रयागनेदिष्ठे गङ्गातीरे श्मशानके।
जनहितं पुरस्कृत्य राजते लघु-मन्दिरे।४।
वागीश्वरो शिवः ख्यातः वागीश्वर्या प्रसादितः।
स च वागेश्वरो जातः जनभाषाप्रभावतः।५।

### २. श्रीलक्षेश्वरपञ्चकम्

ब्रह्महत्यापापं हन्तुं रामानुजस्तु लक्ष्मणः।
क्षेत्रे देवप्रयागीये कृतवांश्च तपो महत्।१।
तटे चालकनन्दायाः स्थाने त्वस्मिन् सुरम्यके ।
लख्मौल्यां शाश्वते धाम्नि भक्त्या शिवमपूजयत्।२।
तत्तपसा प्रसन्नोऽसौ सदाशिवो महेश्वरः।
कालेनाविरभूत्तत्र स्वयम्भूश्च दिगम्बरः ।३।
देवप्रयागतोऽदूरेऽलकनन्दातटे दिव्ये।
समुद्धर्तुं जनान्नित्यं शोभते मन्दिरे शुभे।४।
लक्ष्मणेश्वरनामासौ लक्ष्मणेन प्रसादितः।
क्वचिल्लक्षेश्वरश्चासावपभ्रंशप्रभावतः।५।

### ३. श्रीललितेश्वरपञ्चकम्

ऊर्ध्वं देवप्रयागतः श्रीनगरपथे क्वचित्।
सुदूरेऽलकनन्दायाः वागवान-समीपके।१।
चन्द्रवदनीतः पूर्वं डाङ्गात्पूर्वमरण्यके।
कस्मिंश्चित् सुरम्ये स्थाने पूज्यतेऽसौ महेश्वरः।२।
शिवस्य ललितं रूपं दृश्यते विग्रहे यतः।
ललथपाटभूमौ तु ख्यातोऽस्ति ललितेश्वरः। ।३।
न सामान्य-जनैर्ज्ञातः वक्रमार्गे स्थितो यतः।
दूरे जनरवात् शान्त्या राजते लघु-मन्दिरे।४।
एतद्धि सिद्धपीठेषु पीठमन्यतमं मतम्।।
जयतात्स शिवः शम्भूः जयताल्ललितेश्वरः।५।

### ४. श्रीकिलकिलेश्वरपञ्चकम्

देवप्रयागतोऽप्यग्रे बद्रीनारायणाध्वनि।
लोकहिताय देवेशो राजते मन्दिरे स्वयम्।१।
श्रीनगरस्य नेदिष्ठेऽलकनन्दातटे प्रभुः।
निर्जने श्मशाने क्वचित् सिद्धपीठे सुशोभते।२।
कपालिनः विनोदार्थं योगिन्यो नर्तने रताः।
अद्यापि बहुधा रात्रौ श्रूयते मुखरो ध्वनिः।३।
नदीगर्भे गुहायान्तु देव्याः किलकिलारवात्।
किलकिलेश्वरः ख्यातो रम्ये प्राकृतिके स्थले।४।
नदीज-शीतलैर्वातैः विषज्वालाप्रशान्तये।
स्वयम्भूः शङ्करस्तत्र नित्यवासमकल्पयत्।५।

### ५. श्री-अर्धनारीश्वरपञ्चकम्

सङ्गमेऽलकनन्दाया भागीरथ्याश्च शाश्वते ।
अर्धनारीश्वरो ख्यातो क्वचिद्देवप्रयागके।१।
अधो विराजते चासौ रघुनाथस्य मन्दिरात् ।
यावत्पीठं हरस्यास्ति तावदेतद्धरेर्मतम्।।२।
अर्धनारीश्वरीभूतो मध्ये लिङ्गोऽस्ति कर्तितः।
विरलाद्विरलं रूपं शिवशक्तिसमन्वितम्।३।
मन्दिरेऽनामधेयेऽस्मिन्ननादिकालतस्स्वयम्।
शिवोऽत्र स्वयम्भूभूय साक्षादाविर्बभूव ह।४।
विराजेते श्मशाने द्वे सङ्गमादुभये तटे ।
गृहीत्वाऽर्धतनुं पत्न्याश्चार्धनारीश्वरो जयेत्।५।










ॐ

देवप्रयागसम्बद्धं
पञ्चानन-पञ्चामृतम्।
सिद्ध्यतां लोकहिताय
महामृत्युञ्जयात्मकम् ।।






## श्रावणीपर्व संस्कृतदिवसश्च

भारतीयसंस्कृतौ श्रावणमासस्य विशेषमहत्त्वं वर्तते। श्रावणीपूर्णिमायां जायमानेषु धार्मिककृत्येषु रक्षाबन्धनम् अन्यतमम्। वस्तुतः अस्माकं संस्कृतौ पारस्परिकसम्बन्धस्य अद्भूतं रूपमस्ति रक्षाबन्धनम्। एतच्च पर्व भ्रातृभगिन्योः पवित्रसम्बन्धस्य पर्व। स्व-स्वभावनायै स्थायित्वप्रदानाय एतत्पर्व पाल्यते यद् धार्मिकमहत्तापेक्षया भावनात्मकसम्बन्धस्य विस्तारं करोति। अस्मिन् पर्वणि भगिनी भ्रातुः हस्ते रक्षासूत्रं बध्नाति। प्राचीने काले पत्न्यः अपि सुरक्षासङ्कल्पेन सह पत्युः हस्ते रक्षासूत्रं बध्नान्ति स्म। कालक्रमेण सा परम्परा विनष्टा। प्राचीने काले एषा परम्परा भिन्नरूपेण आसीत्। स्वयं रक्षाकर्ता अथवा रक्षां कर्तुं यः समर्थः सः अभयदानार्थं रक्षणीयस्य हस्ते रक्षासूत्रं बध्नाति स्म। परन्तु क्रमशः तत्र परिवर्तनमागतम्। इदानीम् आत्मरक्षायै वचनं प्राप्तुं रक्षाकर्तुः हस्ते रक्षासूत्रं बध्यते।

सर्वेषां भारतीयपर्वणां काचित् पौराणिकी पृष्ठभूमिः वर्तते। रक्षाबन्धनं न तत्रापवादः। सन्ति काश्चन किंवदन्त्यः एतत्पर्वसम्बद्धाः। तद्यथा–

१. एकदां युधिष्ठिरः कृष्णं पृष्टवान्–'रक्षाबन्धनकथां श्रावयतु' इति। कृष्णः अवदत्–'द्वादशवर्षीये देवासुरसंग्रामे यदा इन्द्रः पराजयं लब्धवान् तदा इन्द्राणी शची बृहस्पतेः उपदेशानुसारं श्रावणीपूर्णिमायां शिवस्तवनं कृत्वा पटे तदक्षतं बद्ध्वा पत्युः इन्द्रस्य दक्षिणहस्ते रक्षासूत्रम् अबध्नात् येन इन्द्रः विजयी अभवत्। ततः रक्षासूत्रम् विजयकामनायां सत्यां बध्यते। अस्य प्रमाणं ऋग्वेदेऽपि लभ्यते।

२. पुराणमतानुसारं ग्रहाणां प्रकोपात् मुक्तये महर्षिणा दुर्वाससा एषा व्यवस्था प्रदत्ता आसीत्।

३. एतत्प्रसङ्गे भगवती-सम्बद्धा कथा अपि उल्लेखनीया। तारकासुर-वधानन्तरं देवाः भगवतीसमीपे रक्षाया उपायं प्रष्टुं गतवन्तः। ततः भगवती एतदर्थं रक्षासूत्रम् प्रदातुं शङ्करं निवेदितवती। रक्षासूत्रं प्रदाय शङ्करः भगवतीमुक्तवान् यत् श्रावणीपूर्णिमायां यः एतत् रक्षासूत्रं बध्नाति सः निर्भयो भविष्यति। शिवस्य निर्देशानुसारं तदारभ्य च एतद् रक्षाबन्धनं भवतीति एकं तथ्यम्।

४. अनेकेषु पुराणेषु एतत् पर्व पुरोहितद्वारा आशीर्वादकर्म इत्यपि मन्यते। अर्थात् पुरोहितः अस्मिन् दिने यजमानेभ्यः नवीनान् यज्ञोपवीतान् धारयितुं प्रयच्छति।

५. भविष्योत्तरपुराणे अपि कथामुखेन प्रतिपादितं वर्तते यत् श्रावणीपूर्णिमायां राजा बलिः रक्षाबन्धनेन बद्धः आसीत्। अस्मिन्नेव दिने च भगवान् वामनः बलिं त्रिपादपरिमितां भूमिं याचितवान्। एवमेव 'येन बद्धो बली राजा दानवेन्द्रो महाबलः। तेन त्वां प्रतिबध्नामि रक्षे! मा चल मा चल।। इत्यादि सूक्तिरपि प्रसिद्ध्यति।

६. अन्यकथानुसारम् एकदा श्रीकृष्णः कस्माच्चिद् आघातं प्राप्तवान्। तस्य हस्ते च क्षतः अभवत्। फलतः ततो रक्तधारा अपि प्रावहत्। श्रीकृष्णस्य सखी द्रौपदी तस्य एतद् दुःखं द्रष्टुं न शक्तवती। अतः स्वशाटिकायाः प्रान्तं निष्कास्य रक्तधारामवरोद्धुं क्षते अबध्नात्। अनेन रक्षाकवचेन रक्तधारा अवरुद्धा। एतेन मन्त्रमुग्धः श्रीकृष्णः द्रौपद्यै कञ्चिद् वरम् अर्पितवान्। तञ्च वरं द्रौपदी कुरुसभायां वस्त्रहरणसमये याचितवती। फलतः श्रीकृष्णः तस्यै प्रभूतं वस्त्रं दत्त्वा तस्या लज्जानिवारणं कृतवान्। एताः सन्ति काश्चन एव पौराणिक्यः मान्यताः। एतदतिरिच्य बह्व्यः लौकिक्यः पौराणिक्यः मान्यताः अपि सम्भवन्ति।

श्रावणिपर्वणि (श्रावणीपूर्णिमायाम्) अस्माभिः संस्कृतज्ञैः संस्कृतम् अधीयानैश्च संस्कृतदिवसः परिपाल्यते। तत्र एतदपि कारणं भवेद् यद् एतेन संस्कृतस्यापि सुरक्षा सुनिश्चिता भवति यथा रक्षाबन्धनेन भगिनीनाम्। अथवा एतदपि भवितुमर्हति यद् एतेन संस्कृतमाता अस्माकं सुरक्षायै प्रतिश्रुता भवति।

## प्रवर्ततां संस्कृतजाह्नवीयम्

**प्रो. बनमाली बिश्वाल:**

वैज्ञानिकी दैवतभारती नः
प्रयुज्यते सङ्गणकेऽद्य सम्यक्।
देशेऽस्मदीयेऽथ च विश्वमध्ये
प्रवर्ततां संस्कृतजाह्नवीयम्॥१॥

भाषामिमां संस्कृतिसारभूतां
प्रवर्द्धनाय प्रणमामि वाणीम्।
अम्बे ! मदिच्छां चरितार्थयित्वा
प्रवर्त्यतां संस्कृतजाह्नवीयम्॥२॥

संसेवितुं संस्कृतभारतीं तां
भवन्तु सज्जाः सुरभारतीज्ञाः।
नित्यं यथा संस्कृतरक्षणं स्यात्
प्रवर्त्यतां संस्कृतजाह्नवीयम्॥३॥

विद्याप्रबुद्धानथशोधाकर्त न
स्वनामधान्यानपि शास्त्रवेतृन्।
प्राध्यापकांश्च प्रतिवेदयामः
प्रवर्त्यतां संस्कृतजाह्नवीयम्॥४॥

मेघाप्लुतश्रावणपूर्णिमायां
सम्पाल्यते तच्छुभसंस्कृताहः!
वर्षासहस्रञ्च शरद्वसन्तं
प्रवर्ततां संस्कृतजाह्नवीयम्॥५॥

वन्देऽत्र पुष्पाञ्जलिबद्धहस्तः
चिरं शतं जीवतु संस्कृतं नः।
भावैर्महद्भिः सह चास्मदीयैः
प्रवर्ततां संस्कृतजाह्नवीयम्॥६॥

श्रद्धाऽस्तु नो वैदिकभारतीषु
कुतोऽस्ति लाभः बहुभाषणेन?
शास्त्रीयतत्त्वैः सततं गभीरा
प्रवर्त्यतां संस्कृतजाह्नवीयम्॥७॥

वन्दे कवीन् संस्कृतवाणिपुत्रान्
श्रीकालिदासान् भवभूतिमाघान्।
सम्प्रार्थये शास्त्रचयप्रवर्तृन्।
प्रवर्त्यतां संस्कृतजाह्नवीयम्॥८॥

रक्षा यथा स्याद् वरसंस्कृतेर्नः
यथा सुरक्षाऽस्तु च देववाण्याः।
शास्त्रस्य रक्षामपि संविधातुं
प्रवर्ततां संस्कृतजाह्नवीयम्॥९॥

वागेव सा संस्कृतसंस्कृता या
सुधीरसौ संस्कृतपूतजिह्वः।
तस्मात् सखे ! प्रार्थय विश्वनाथं
प्रवर्ततां संस्कृतजाह्नवीयम्॥१०॥

# डा. सुशील को मिला श्री रघुनाथ कीर्ति हिंदी सेवा सम्मान

देवप्रयाग। राष्ट्रीय संस्कृत संस्थान के श्री रघुनाथ कीर्ति परिसर में हिंदी पखवाड़े पर कई प्रतियोगिताएं आयोजित की गई। इस मौके पर हिंदी के क्षेत्र में सर्वश्रेष्ठ कार्य करने पर डा. सुशील कुमार कोटनाला को श्री रघुनाथ कीर्ति हिंदी सेवा सम्मान से नवाजा गया।

रविवार को कार्यक्रम के समापन पर कर्मचारियों की नोटिंग एवं ड्राफ्टिंग प्रतियोगिता में नवीन कुमार प्रथम व ओमप्रकाश द्वितीय स्थान पर रहे। जबकि सुलेख में नवीन कुमार पहले व राजेंद्र सिंह दूसरे ... रहे। दूसरी ओर ... निबंध प्रतियो... संदीप को... रहे। सु... कोठारी... शास्त्री... इसके ... ज्ञान प्र... विजेता ... रहे। साथ ... पहले व श्रीनि... अपनी जगह बना... प्राची नौटियाल व कनिका ... क्रमशः पहले, दूसरे नंबर पर रही। मुख्य अतिथि उत्तराखंड संस्कृत विश्वविद्यालय के कुलपति प्रो. पीयूषकांत दीक्षित ने कहा कि ... हमारी संस्कृति ...

# वृत्तदर्पणे परिसरः

# संस्कृत भाषा के प्रचार- प्रसार व संरक्षण का लिया संकल्प

देवप्रयाग (ब्यूरो)। राष्ट्रीय संस्कृत संस्थान के श्री रघुनाथ कीर्ति परिसर में संस्कृत सप्ताह का शुभारंभ किया गया। इस मौके पर छात्रों ने संस्कृत भाषा के प्रचार प्रसार व संरक्षण का संकल्प लिया।

बुधवार को संस्कृत सप्ताह के पहले दिन छात्रों ने संस्कृत भाषा के संरक्षण और प्रचार-प्रसार का संकल्प लिया। आयोजित गोष्ठी में छात्रों ने वेदपाठ कर संस्कृत के महत्व और भविष्य पर विचार रखे। कार्यक्रम की शुरुआत करते हुए महंत राजेश स्वरूप ने कहा कि हर कोई मनुष्य ज्ञानी है। ज्ञान को कैसे निखारा जाय व उसका सदुपयोग कैसे किया जाय यह मनुष्य की मनोवृत्ति पर निर्भर करता है। उन्होंने



राष्ट्रीय संस्कृत संस्थान देवप्रयाग में हुआ संस्कृत सप्ताह का शुभारंभ।

**श्री रघुनाथ कीर्ति परिसर में संस्कृत सप्ताह की शुरुआत**

है। संस्थान के प्राचार्य प्रो. केबी सुब्बरायुडु ने छात्रों को संस्कृत भाषा के प्रचार प्रसार के लिए समर्पित भाव से कार्य करने को कहा है। कहा कि अगले सत्र से

संयोजक डा. आर बालमुरुगन ने कहा कि संस्कृत सप्ताह में छात्रों की कंठ पाठ, भाषण, एकल गायन आदि प्रतियोगिताएं भी होंगी। मौके पर केंद्रीय लोकनिर्माण विभाग के सहायक अभियंता राजीव वर्मा, जितेंद्र, डा. शैलेंद्र उनियाल, डा.



संस्कृत सप्ताह के विजेता छात्र-छात्राओं सम्मानित करते संस्कृत विद्यालय हरियाणा के कुलपति प्रो. श्रीयांश द्विवेदी।

## संस्कृत भाषा का अध्ययन जरुरी: कुलपति

देवप्रयाग। राष्ट्रीय संस्कृत संस्थान श्री रघुनाथ कीर्ति परिसर में संस्कृत सप्ताह का समापन हो गया। इस मौके पर मुख्य अतिथि महर्षि संस्कृत विवि मुंदड़ी हरियाणा के कुलपति प्रो. श्रीयांश द्विवेदी ने कहा कि संस्कृत भाषा का अध्ययन मात्र नौकरी के लिए नहीं किया जाना चाहिए। बल्कि मनुष्य चिंतन के लिए भी आवश्यक है। कहा कि देश व विदेश में संस्कृत भाषा का महत्व बढ़ रहा है। जिसका मुख्य कारण संस्कृत भाषा में योग व आयुर्वेद जैसी विधाओं का समावेश है। विशिष्ट अतिथि अपर जिलाधिकारी रामजी शरण शर्मा ने कहा कि संस्कृत के छात्रों की वाक शैली व स्मरण शक्ति नैतिकता अन्य की तुलना में अच्छी होती है। कार्यक्रम में निबंध लेखन में क्रमशः स्थान प्राप्त करने वाले श्याम देव, संदीप कोठारी, प्रियंका, भाषण प्रतियोगिता के विजेता संदीप कोठारी, प्राची नौटियाल, बालकृष्ण व निबंध लेखन के जूनियर वर्ग की हर्षिता, रुचिका, दीक्षा तथा निबंध लेखन आधुनिक के विजेता आयुषी नेगी, शिवानी, श्रुति निबंध लेखन पारंपरिक के विजेता राम तिवाड़ी, दीपक नौटियाल व आधुनिक निबंध वर्ग की सीनियर प्रतिस्पर्धा में स्थान पाने वाली नेहा पंचभैया, वर्षा भट्ट तथा संस्कृत एकल गान के विजेता अनुरुद्ध त्रिपाठी, भावेश, श्रोतिय व संस्कृत भाषण के जूनियर वर्ग के अमन भट्ट, आदित्य भंडारी तथा अंकित ठाकुर को पुरस्कृत ... गया। ब्यूरो

# 'संस्थान के निर्माण में मदद करेंगे'



# ...लीन गंगा के लिए जुटे



# गंगा एवं पर्यावरण के लिए लगाई दौड़

गंगा की अविरलता बनाए रखने का आह्वान

# देवप्रयाग में छात्रों ने चलाया सफाई अभियान

# उत्तरकाशी में गंगा सफाई को लेकर निकाली रैली

23/may/2017

# निर्मीयमाणानि परिसरीय-भवनानि



Raghunathavartavali : Quartrly News Bulletin of Shri Raghunath Kirti Campus, Rashtriya Sanskrit Sansthan, Published by the Principal for Shri Raghunath Kirti Campus, Devaprayag, Uttarakhand and Printed by DV Printers, 97-UB, Jawahar Nagar, Delhi-110 007